CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library
S.D.P.B
Coll. No. 226

Title Bhāgavata X sk.

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No. : 226.

Subject : A. Purāṇa B. Paurāṇika. C. Philosophy. D. Tantra.

Title : A. Bhāgavata. 10th skan. 29th Adhya. B. Krishnalīlā. C. Saptaśloki Gītā D. Gokula stava Rāsa.

Author : —

Scribe : —

Date of the work : —

Date of the Ms. : —

Place of the work : —

Place of the Ms. : —

Size : 7" x 4" Book form.

Extent : 36 foll.

Language : Sanskrit in A, C, & D Old Gujarati in B

Script : Devanāgarī.

Remarks : Some foll from middle part are missing

५९ श्रीरामकृष्णायनमः॥ ॐमित्येकाक्षरंब्रह्मव्याहरन्मा
मनुस्मरन्॥ यःप्रयातित्यजन्देहंसयातिपरमांगतिं॥
१॥ सर्वतःपाणिपादंतत्सर्वतोक्षिशिरोमुखं॥ सर्वतः
श्रुतिमल्लोकेसर्वमावृत्यतिष्टति॥२॥ स्थानेहृषीकेश
तवप्रकीर्त्याजगत्प्रहृष्यत्यनुरज्यतेच॥ रक्षांसिभीता
निदिशोद्रवंतिसर्वेनमस्यंतिचसिद्धसंघाः॥३॥ कविं
पुराणमनुशासितारमणोरणीयांसमनुस्मरेद्यः॥ सर्व
स्यधातारमचिंत्यरूपमादित्यवर्णंतमसःपरस्तात्॥४॥
ऊर्ध्वमूलमधःशाखमश्वत्थंप्राहुरव्ययं॥ छंदांसियस्य
पर्णानियस्तंवेदसवेदवित्॥५॥ सर्वस्यचाहंहृदिस

न्निविष्टोमत्तःस्मृतिर्ज्ञानमपोहनंच॥ वेदैश्चसर्वैरहमेववे
द्योवेदांतकृद्वेदविदेवचाहं॥६॥ मन्मनाभवमद्भक्तोमद्या
जीमांनमस्कुरु॥ मामेवैष्यसिसत्यंतेप्रतिजानेप्रियोसिमे
७॥ योमांगीतासमूहेनस्तोतुमिच्छतिपांडव॥ सोहमेकेनश्लोकेन
स्तुतएवनसंशय॥८॥ ॥इतिश्रीसप्तश्लोकीगीतासंपूर्णः
॥श्रीराधाकृष्णायनमः॥ ॐअस्यश्रीगोतमीतं ५
त्रस्यनारदऋषिरनुष्टुप्छंदः॥ श्रीकृष्णपरमा
त्मादेवता॥ श्रीकृष्णप्रीत्यर्थेजपेविनियोगः
॥१॥ सजलजलदनीलंदर्शितोदारलीलं॥

करतलधृतसेलं वेणुवाद्यरसालं ॥ व्रजजनकु न
लपालं कामिनीकेलिलोलं ॥ तरुणतुलसीमा
लं नौमी गोपालवालं ॥२॥ नारद उवाच ॥ नवि
ननीरदश्यामं नीलेंदिवरलोचनं ॥ वल्लवीनंद
नं वंदे कृष्णं गोपालरूपिणं ॥३॥ स्फुरद्बर्हिदलो
द्बद्धनीलकुंचितमूर्धजं ॥ कदंबकुसुमोद्भासी
वनमालाविभूषितं ॥४॥ गंडमंडलसंसर्गिच
लत्कांचनकुंडलं ॥ स्थूलमुक्ताफलोदारःहारो

द्योतितवक्षसं ॥५॥ हेमांगदतुलाकोटिकिरीटोज्व
लविग्रहं ॥ मंदमारुतसंक्षोभ वलितांवरसंचयं
॥६॥ रुचिरोष्ठपुटन्यस्तवंशीमधुरनिस्वनैः ॥ लस
त्गोपालिकाचेतोमोहयंतं मुहुर्मुहुः ॥७॥ वल्लवीव
दनांभोजमधुपानमधुव्रतं ॥ क्षोभयंतं मनस्तासां
सुस्मेरापांगवीक्षणैः ॥८॥ यौवनोद्भिन्नदेहाभिः सं
सक्ताभिः परस्परं ॥ विचित्रांवरभूषाभिर्गोपना
रीभिरावृतं ॥९॥ प्रभिन्नांजनकालिंदीजलके

लिकलोत्सुकं॥९॥योध्यपंतंकचिजोपान्व्याहरंतं
गवांगणं॥१०॥कालिंदीजलसंसर्गिसीतलानि
२ जकंपितं॥कदंबपादपछायेस्थितंवृंदावनेकचि
त्॥११॥रत्नभूधरसंलग्नरत्नासनपरिग्रहं॥क॰
ल्पपादपमध्यस्थहेममंडपिकागतं॥१२॥वसंत॰
कुसुमामोदसुरभीकृतदिङ्मुखे॥गोवर्द्धनगि
रौरम्येस्थितंरासरसोत्सुकं॥१३॥सव्य हस्तत २
लन्यस्तगिरिवर्य्यातपत्रकं॥खंडिताखंडलो॰

॥श्री॥गजेंद्रउवाच॥ॐनमोभगवतेतस्मैय
तएतच्चिदात्मकं॥पुरुषायादिबीजायपरेशा॰
याभिधीमहि॥१॥यस्मिन्निदंयतश्चेदंयेनेदंयर
दंस्वयं॥योस्मात्परस्माच्चपरस्तंप्रपद्येस्वयंभु
वं॥२॥यःस्वात्मनीदंनिजमाययार्पितंकचि॰
द्विभातंक्वचतत्तिरोहितं॥अविद्धदृक्साक्ष्युभ
यंतदीक्षतेसआत्ममूलोवतुमांपरात्परः॥३॥
कालेनपंचत्वमितेषुकृत्स्नसोलोकेषुपालेषु
चसर्वहेतुषुतमस्तदासीद्गहनंगभीरंयस्तस्य

पारेभिविराजतेविभुः॥४॥नयस्यदेवाऋषयःप
दंविदुर्जंतुःपुनःकोर्हतिगंतुमीरितुं॥यथानट
स्याकृतिभिर्विचेष्टतोदुरत्ययानुक्रमणःसमा
ऽवतु॥५॥दिदृक्षवोयस्यपदंसुमंगलंविमुक्त
संगामुनयःसुसाधवः॥चरंत्यलोकव्रतमव्रणं
वनेभूतात्मभूताःसुहृदःसमेगतिः॥६॥नवि
द्यतेयस्यचजन्मकर्मवाननामरूपेगुणदोष
एववा॥तथापिलोकाप्ययसंभवायःस्वमाय
यातान्यनुकालमृच्छति॥७॥तस्मैनमःपरेशा

यब्रह्मणेनंतशक्तये॥अरूपायोरुरूपायनमआ
श्चर्यकर्मणे॥८॥नमआत्मप्रदीपायसाक्षिणेपरमा
त्मने॥नमोगिरांविदूरायमनसश्चेतसामपि॥९॥
सत्वेनप्रतिलभ्यायनैष्कर्म्येणविपश्चिता॥नमःकै
वल्यनाथायनिर्वाणसुखसंविदे॥१०॥नमःशांता
यघोरायमूढायगुणधर्मिणे॥निर्विशेषायसाम्या
यनमोज्ञानघनायच॥११॥क्षेत्रज्ञायनमस्तुभ्यंस
र्वाध्यक्षायसाक्षिणे॥पुरुषायात्ममूलायमूलप्र
कृतयेनमः॥१२॥सर्वेंद्रियगुणद्रष्ट्रेसर्वप्रत्ययहे

तवे ।। असत्ताछायोक्ताय सदाभासाय ते नमः ।।१४।। नम
स्तेखिलकारणाय निःकारणायाद्भुतकारणाय ।। सर्वागमा २
२ म्नायमहार्णवाय नमोऽपवर्गाय परायणाय ।।१५।। गुणार
णिछन्नचिदूष्मपाय तत्क्षोभविस्फूर्जितमानसाय नै:
कर्म्यभावेन विवर्जितागम स्वयंप्रकाशाय नमस्करोमि
।।१५।। मादृक्प्रपन्नपशुपाशविमोक्षणाय मुक्ताय भूरिक
रुणाय नमोलयाय ।। स्वांशेन सर्वतनुभृन्मनसि प्रतीतप्र
क त्यग्दृशे भगवते बृहते नमस्ते ।।१६।। आत्मात्मजाप्तगृहवि
त्तजनेषु शक्तैर्दुःप्रापणाय गुणसंगविवर्जिताय मुक्तात्म
भिः स्वहृदये परिभाविताय ज्ञानात्मने भगवते नम ईश्वराय ।।

।।१७।। यं धर्मकामार्थविमुक्तिकामा भजंत इष्टां गतिमा
प्नुवंति ।। किं त्वाशिषो रात्यपि देहमव्ययं करोतु मेदभ्रदयो
विमोक्षणम् ।।१८।। एकांतिनो यस्य न कंचनार्थं वांछंति ये
वै भगवत्प्रपन्नाः ।। अत्यद्भुतं तच्चरितं सुमंगलं गायंत आ
नंदसमुद्रमग्नाः ।।१९।। तमक्षरं ब्रह्मपरं परेशमव्यक्तमाध्या
त्मिकयोगगम्यं ।। अतींद्रियं सूक्ष्ममिवातिदूरमनंतमा
द्यं परिपूर्णमीडे ।।२०।। यस्य ब्रह्मादयो देवा वेदा लोकाश्चरा
चराः ।। नामरूपविभेदेन फल्ग्व्या च कलया कृताः ।।२१।।
यथार्चिषोग्नेः सवितुर्गभस्तयो निर्यांति संयांत्यसकृ
त्स्वरोचिषः ।। तथायतोयं गुणसंप्रवाहो बुद्धिर्मनः खा

निश्रारारसर्गः॥२२॥ सर्वेनदेवासुरमर्सीतियैक् नस्त्रीनष
ढोनपुमान्नजंतुः॥ नायंगुणः कर्मनसन्नचासन्निषेधशे
३ षोजयतादशेषः॥२३॥ जिजीविषेनाहमिहामुयाकिमं
तर्वहिश्चावृतयेभयोन्या॥ इछामिकालेननय[stain]स्यवि
प्लवस्तस्यात्मलोकावरणस्यमोक्षं॥२४॥ सोहंविश्वसृजं
विश्वमविश्वंविश्ववेदसं॥ विश्वात्मानमजंब्रह्मप्रणतो ३
स्मिपरंपदं॥२५॥ योगरंधितकर्माणो [illegible] हृदियो
गविभावितेयोगिनोयंप्रपश्यंतियोगेशंतंनतोस्म्यहं
॥२६॥ नमोनमस्तुभ्यमसह्यवेगशक्तित्रयायाखिलधी
गुणायप्रपन्नपालायदुरंतशक्तयेकदिंद्रियाणामनवाप्य

नुकामुक्तासुरघनाघनं॥४॥ वेणुवाद्यमहो
ल्लासकृतहुंकारनिःस्वनैः॥ सवत्सैरुन्नमुखैः स
स्वडोपालैरभिवाहितं॥५॥ कृष्णमेवानुगाय
द्भिस्तच्चेष्टावशवर्त्तिभिः॥ दंडपाशोद्यतकरैर्गो
पालैरुपशोभितं॥६॥ नारदाद्यैर्मुनिश्रेष्ठैर्वे
२ दवेदांगपारगैः प्रीतिसुस्निग्धयावाचास्तूयमा
नंपरास्परं॥७॥ यइमं[stain] चिंतयेद्देवंनक्त्यासं
स्तौतिमानवः॥ त्रिसंध्यंतस्यतुष्टोसौददातिव

रमीक्षितं॥२८॥ हृदम्बबद्धनत्तामेतिनवेत्सर्वेज
नप्रियः॥ अचलांश्रियमाप्नोतिसवाग्मीजायते
ध्रुवं॥२९॥ इतिश्रीगौतमीतंत्रेगोपालस्तवराज
संपूर्णं॥

य